यथा श्रीकृष्णशिशुपालयोः ॥ वास्तुजम् २ यथा कौरवपाण्डवानाम् ॥ वाग्जम् ३ यथा द्रोणद्रुपदयोः ॥ शापजम् ४ मूषिकनकुलयोः ॥ अपराधजम् ५ यथा पूजनीब्रह्मदत्तयोः ॥ इति महाभारतम् ॥

जातिसारं, क्ली, (जात्या स्वभावतः सारोऽत्र ।) जातीफलम् । इति राजनिर्घण्टः ॥ (जातीफलशब्देऽस्य विवृतिर्ज्ञेया ॥)

जाती, स्त्री, (जन + क्तिच् । ततो वा ङीप् ।) जातीपुष्पम् । चमेली इति हिन्दी भाषा ॥ तत्पर्य्यायः सुरभिगन्धा २ सुमनाः ३ सुरप्रिया ४ चेतकी ५ सुकुमारा ६ सन्ध्यापुष्पी ७ मनोहरा ८ राजपुत्त्री ९ मनोज्ञा १० मालती ११ तैलभाविनी १२ जनेष्टा १३ हृद्यगन्धा १४ । (एतस्या हि सर्व्वपुष्पेषु श्रेष्ठत्वमुक्तम् । यथा, "पुष्पेषु जाती नगरेषु काञ्ची ।" इति उद्भटः ॥) अस्या गुणाः । तिक्तत्वम् । शीतत्वम् । कफमुखपाकनाशित्वम् । इति राजनिर्घण्टः ॥ उष्णत्वम् । तुवरत्वम् । लघुदोषशिरोऽक्षिदन्तरोगविषकुष्ठव्रणरक्तदोषनाशित्वञ्च । इति भावप्रकाशः ॥ तत्कुड्मलस्य गुणः । नेत्ररोगव्रणविस्फोटकुष्ठनाशित्वम् । इति राजनिर्घण्टः ॥

जातीकोशं, क्ली, (जातीत्याख्यया कोशमिव फलमिति यावत् ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"जातीकोशोऽथ कर्पूरं जातीकटुकयोः फलम् ।
कक्कोलकं लवङ्गञ्च तिक्तं कटुकफापहम् ॥")

जातीकोषं, क्ली, (जातीत्याख्यया कोषमिव फलम् ।) जातीफलम् । इति हेमचन्द्रः ॥

जातीपत्री, स्त्री, (जातीपत्त्रमिवास्त्यस्यामिति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । ततो ङीप् ।) जातीफलत्वक् । जैत्री इति भाषा । तत्पर्य्यायः । जातिकोषी २ सुमनःपत्रिका ३ मालतीपत्त्रिका ४ सौमनसायनी ५ जातिपत्त्री ६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । सुरभित्वम् । कफनाशनाशित्वम् । वक्त्रवैशद्यजननत्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । स्वादुत्वम् । उष्णत्वम् । रुचिवर्णकारित्वम् । कफकासवमिश्वासतृष्णाविषनाशित्वञ्च । इति भावप्रकाशः ॥ दुर्गन्धनाशित्वम् । इति राजवल्लभः ॥

जातीफलं, क्ली, (जातीत्याख्यं फलम् ।) सुगन्धफलविशेषः । जायफल इति भाषा ॥ तत्पर्य्यायः । जातीकोषम् २ । इत्यमरः । २।६।१३२ ॥ जातीकोशम् ३ जातिफलम् ४ । इति तट्टीका ॥ जातिशस्यम् ५ शालूकम् ६ मालतीफलम् ७ मज्जसारम् ८ जातिसारम् ९ पुटम् १० सुमनःफलम् ११ फलजातिः १२ फलजाती १३ कोशम् १४ कोषम् १५ जातिकोषम् १६ कोषकम् १७ । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । १६ । ३० ।

"जातीफलागुरुवचापिप्पल्यश्चन्दनं च भृङ्गेः ॥")

अस्य गुणाः । कषायत्वम् । उष्णत्वम् । कटुत्वम् । कण्ठामयारुचिवातातीसारमेहनाशित्वम् । वृष्यत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ रसे तिक्तत्वम् । तीक्ष्णत्वम् । रोचनत्वम् । ग्राहित्वम् । स्वरहितत्वम् । श्लेष्मानिलमुखवैरस्यमलदौर्गन्ध्यकृष्णताकृमिकासवमिश्वासशोषपीनसहृद्रुजानाशित्वञ्च । इति भावप्रकाशः ॥ तृष्णाशूलनाशित्वम् । इति राजवल्लभः ॥

जातीयः, त्रि, (जातौ भवः । "वृद्धाच्छः ।" ४ । २ । ११४ । इति छः ।) जातिभवः । यथा, कथासरित्सागरे । २३ । ४८ ।

"प्राग्जन्मभिन्नजातीयाः परिहृत्यैव कन्यकाः ॥")

तद्धितप्रत्ययविशेषः । स तु प्रकारार्थे भवति । यथा । तार्किकजातीया । इति मुग्धबोधमतम् । (पाणिनिमते तु जातीयर् ॥)

जातीरसं, क्ली, (जात्या रसः इव रसो यस्य ।) बोलः । इति राजनिर्घण्टः ॥

जातु, व्य, (जन + क्तुन् । पृषोदरात् साधुः ।) कदाचित् । इत्यमरः । ३ । ४ । ४ ॥ (यथा, मनुः । २ । ९४ ।

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥")

सम्भावितार्थः । (यथा, महाभारते ।५।१७६।२२।

"का जातु परभार्य्यां हि नारीं व्यालीमिव स्थिताम् ।
वासयेत गृहे जानन् स्त्रीणां दोषो महात्ययः ॥")

गर्हार्थः । इति शब्दरत्नावली ॥ [रम् ॥"

("जातु निन्दसि गोविन्दं जातु निन्दसि शङ्क-
इति मुग्धबोधव्याकरणम् ॥)

जातुकं, क्ली, (जातु गर्हितं निन्दितं दूषितमित्यर्थः कं जलं यस्मादिति ।) हिङ्गु । इति शब्दचन्द्रिका ॥

जातुधानः, पुं, (धीयते सन्निधीयते इति धानं सन्निधानमस्य जातु गर्हितं । धानमभिधानमस्येति ।) यातुधानः । राक्षसः । इत्यमरटीकायां रमानाथः ॥ (यथा, कालिकास्तोत्रे ।

("जातुधानाः पिशाचाश्च कुष्माण्डा भैरवादयः ॥"

जातुषं, त्रि, (जतुनो विकारः । "त्रपुजतुनोः षुक् ।" ४ । ३ । १३८ । इति अण् षुक् च ।) जतुविकारः । जतुनिर्म्मितम् । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । १२० ।

"अन्यप्रतापमासाद्य यो दृढ़त्वं न गच्छति ।
जातुषाभरणस्येव रूपेणापि हि तस्य किम् ॥")

जातोक्षः, पुं, (जातश्चासौ उक्षा चेति । जातः प्राप्तद्वयावस्थः उक्षा इत्यर्थः । "अचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) उत्पन्न उक्षा । इत्यमरः । २ । ९ । ६१ ॥ उत्पन्नो वृद्धत्वभावः । प्राप्तबलीवर्द्दभाव उक्षा । इति भरतः ॥

जात्यः, त्रि, (जातौ भवः इति यत् ।) कुलीनः । श्रेष्ठः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । १६ । ६ ।

"स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ॥")

कान्तः । इति जटाधरः ॥ (यथा, महाभारते । ५ । ३३ । १२२ ।

"अतीव स भायते ज्ञातिमध्ये
महामणिर्ज्जात्य इव प्रसन्नः ॥")

जात्यन्धः, त्रि, (जात्या जन्मनैव अन्धः ।) जन्मान्धः । यथा, मनुः । ९ । २०१ ।

"अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजड़मूकाश्च ये च केचिन्निरिन्द्रियाः ॥"

जादी, त्रि, (जात इत्यस्य जादी इतीत्थत्प्रयोगस्तु प्राकृतलङ्केश्वरसम्मत इति बोध्यम् ।) जातः । इति प्राकृतलङ्केश्वरः ॥

जानकी, स्त्री, (जनकस्य मिथिलाधिपस्यापत्यं स्त्री अण् ङीप् च ।) सीता । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । २७३ । १ ।

"प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ ।
रक्षसा जानकी तस्य हृता भार्य्या बलीयसा ॥")

जानपदः, पुं, (जाने जन्मना पदाति इति अण् ।) जनः । (यथा, याज्ञवल्क्ये । २ । ३७ ।

"देयं चौराहृतं द्रव्यं राज्ञा जानपदाय तु ।
अददद्धि समवाप्नोति किल्बिषं यस्य तस्य तत् ॥"

जनपद एव । स्वार्थे अण् ।) देशः । इति मेदिनी । दे, ४ । ४८ ॥ जनपदे भवः । इति "उत्सादिभ्योऽञ् । ४ । १ । ८६ इत्यञ् । देशभवे, त्रि ॥ यथा, मनुः । ८ । ४१ ।

"जातिजानपदान् धर्म्मान् श्रेणीधर्म्मांश्च
धर्म्मवित् ॥")

जानु, क्ली, (जायते इति । जन् "दृसनिजनिचरिचटिभ्यो ञुण् ।" उणा १ । ३ । इति ञुण् ।) ऊरुजङ्घयोर्म्मध्यभागः । हाँटु इति भाषा ॥ (यथा, महाभारते । ४ । ३२ । ३६ ।

"तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना ॥")

तत्पर्य्यायः । ऊरुपर्व्व २ अष्ठीवत् ३ अष्ठीवान् ४ । इत्यमरः । २ । ६ । ७२ ॥ चक्रिका ५ । इति राजनिर्घण्टः ॥

जापः, पुं, (जप + भावे घञ् ।) जपः । इति जटाधरः ॥

जापकः, त्रि, (जपतीति । जप् + ण्वुल् ।) जपकर्त्ता । (यथा, महाभारते । १२ । १९९ । ३ ।

"जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत ।
किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः ॥"

जपेन कृतं जपजन्यमित्यर्थः । जप् + अण् + स्वार्थे कन् । जपजन्ये, त्रि । यथा, महाभारते । १२ । १९९ । ४९ ।

"अथवा सर्व्वमेवैष मामकं जापकं फलम् ॥")

जापनं, क्ली, (जप् + स्वार्थे णिच् + भावे ल्युट् ।) निरसनम् । निर्व्वर्त्तनम् । इति धरणिः ॥ (यथा । यथा, संवर्त्तसंहितायाम् । २०९ ।

"मुच्यते सर्व्वपापेभ्यो गायत्र्याश्चैव जापनात् ॥")